


**ISSN Print:** 2394-7500
**ISSN Online:** 2394-5869
**Impact Factor:** 5.2
IJAR 2016; 2(1): 956-958
www.allresearchjournal.com
Received: 24-11-2015
Accepted: 25-12-2015

**अमर नाथ झा**
गवेषकः, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

**Corresponding Author:**
**अमर नाथ झा**
गवेषकः, कामेश्वर सिंह दरभंगा संस्कृत विश्वविद्यालय, दरभंगा, बिहार, भारत

# न्यायादिदर्शनरीत्या आत्मतत्त्वविचारः

**अमर नाथ झा**

**प्रस्तावनाः**

न्यायशास्त्रे– **"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभाव फलदुःखापवर्गास्तु प्रमेयम्"** इति सूत्रम् । अर्थात् आत्मा, शरीर, इन्द्रिय, अर्थ, बुद्धि, मन, प्रवृत्ति, दोष, प्रेत्यभाव, फल, दुःख एवञ्च अपवर्ग: एते द्वादश प्रमेयानि सन्ति । द्वादश प्रमेयेषु आत्मा प्रधानोस्ति । आत्मनिरूपणम् अनेन प्रकारेण क्रियते– **"तत्रात्म त्वसामान्येवानात्मा"** । स च देहेन्द्रियादिव्यतिरिक्तः, प्रतिशरीरं भिन्नो नित्यो विभुश्च। स च मानसप्रत्यक्षः। विप्रतिपत्तौ तु बुद्धयादिगुण लिङ्गकः। तथा हि बुद्धयादयस्तावद् गुणाः, अनित्यत्वे सत्येकोन्द्रियामात्रग्राह्यत्वात् । गुणश्च गुण्याश्रित एव ।।
न्यायशास्त्रे द्रव्यमेव आत्मा स्वीक्रियते । यथा– तत्र बुद्धयादयो गुणा न भूतानां मानसप्रत्यक्षत्वात् । ये हि भूतानां गुणास्ते न मनसा गृह्यन्ते यथा रूपादयः। नापि दिक्कालमनसां गुणा, विशेषगुणत्वात्। ये हि दिक्कादिगुणाः संख्यादयो न ते विशेषगुणास्ते हि सर्वद्रव्य–साधारणगुणा एव । बुद्धयादयस्तु विशेषगुणाः। गुणत्वे सत्येकेन्द्रियमात्रग्राह्ययत्वाद, रूपवतो अतो न दिगादिगुणाः। तस्मादेभ्योऽष्टभ्यो व्यतिरिक्तो बुद्धयादीनां गुणानामाश्रयो गुणी वक्तव्यः स एवात्मा ।
आत्माया अस्तित्वस्य साधकः अनुमानस्य प्रयोगः अनेन रूपेण प्राप्यते–प्रयोगश्च, बुद्धयादयः पृथिव्याद्यष्टद्रव्यतिरिक्तद्रव्याश्रिताः, पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात् । यस्तु पृथिव्याद्यष्टद्रव्य व्यतिरिक्तद्रव्याश्रितो न भवति, नासौ पृथिव्याद्यष्टद्रव्यव्यतिरिक्तद्रव्या नाश्रितत्वे सति गुणोऽपि भवति यथा रूपादिरिति केवलव्यतिरेकी। अन्वयव्यतिरेकी वा । तथा हि, बुद्धयादयः पृथिव्याद्यष्टद्रव्यव्यति रिक्तद्रव्याश्रिताः पृथिव्याद्यष्टद्रव्यानाश्रितत्वे सति गुणत्वात्। यो यदनाश्रितो गुणः स तदतिरिक्ताश्रितो भवति । यथा पृथिव्याद्यनाश्रितः शब्दिः पृथिव्याद्यतिरिक्ताकाशाश्रय इति। तथा च बुद्धयादयः पृथिव्या द्यष्टिद्रव्यातिरिक्ताश्रयाः। तदेवं पृथिव्याद्यष्टद्रव्यव्यतिरिक्तो नवमं द्रव्यमात्मसिद्धः।
सच सर्वत्र कार्योपलम्भाद् विभुः, परममहत्परिमाणवानित्यर्थः। विभुत्वाच्च नित्योऽसौ व्योमवत । सुखादीनां वैचित्र्यात् प्रतिशरीरं भिन्नः।
आत्मतत्वस्य परिमाणस्य समबन्धे ज्ञायते यत्– "आत्मा" अयं एकः अतिरिक्त नवम् द्रव्योस्ति, तथापि कोऽपि द्रव्यः परिमाण शून्यः न भवति । अनेन कारणेन अस्य आत्माया परिमाणस्य विचारं आवश्यकम् विद्यते। रामानुजादिदार्शनिकानुसारेण आत्माया अणु परिमाणोस्ति । जैन दार्शनिकानुसारेण अस्य मध्यम परिमाणोस्ति । मध्यम परिमाणस्य अर्थोस्ति– शरीरसम परिमाण । किन्तु न्याय एवञ्च वैशेषिक दर्शनस्य विदुषानुसारेण अस्य "विभु" अर्थात् परममहत् परिमाणोस्ति । अतएव तर्कभाषाकारेण "आत्माया" परिमाण: "विभु" स्वीक्रियते । अस्य अर्थ अनेन रूपेण कथयति-

तत्र प्रथम प्रकार: आत्मा परममहत्त्वपरिमाणवानोस्ति । अत्र "महत्" कथित्वा भाव प्रधानस्य निर्देशो भवति । अन्यथा "आन्महतः समानाधिकरणजातीययोः" सूत्रेण महापरिमाण शब्दस्य प्रयोगः क्रियते । भावप्रधाननिर्देशन "परममहत्परिमाणवानस्य अयं अर्थोस्ति यत्– परमं निरवधिकं महत्त्वं परिमाणं यस्य सः" ऐतादृशः आत्मा । विभूत्वेन सर्वमूर्त-द्रव्य-संयोगित्व वा इयत्तानवच्छिन्न-परिमाणयोगित्व अर्थोस्ति । सर्वमूर्तद्रव्यसंयोगित्वस्य अर्थोस्ति– विश्वस्य यच्च यावत् समस्त मूर्त द्रव्येन संयुक्तः। समस्त मूर्त द्रव्येन संयोगः त्रय प्रकारेण संभवोस्ति । अयमोस्ति यत्– "आत्मा" कुत्र एक: स्थाने तिष्ठत्वेसति एवञ्च समस्त मूर्तद्रव्य तस्य समीपे स्वयमेव आगच्छति । द्वितीयः प्रकारः अयमोस्ति यत्– आत्मा स्वयमेव मूर्तद्रव्यस्य समीपे आगच्छति । तृतीय प्रकारः अयमोस्ति यत्– तस्य आत्माया एतादृशः महान् परिमाणो विद्यते । यस्य कारणेन विश्वस्य समस्त मूर्त द्रव्यः तस्य परिध्यां आगच्छति ।

अस्य त्रय प्रकारके प्रथम प्रकार अव्यावाहारिकेन उपहासास्प दोस्ति । द्वितीय प्रकारकोऽपि बुद्धिग्राह्ययो नास्ति । कथं तु यदि सः आत्मा मूर्त द्रव्यस्य समीपे निरर्थकं गच्छति तदा जगतस्य अन्यान्य व्यवहारः कदा एवञ्च केन प्रकारेण करिष्यति । द्वितीय वार्ता अयमोस्ति यत् संसारस्य सर्वे मूर्तद्रव्येषु एकश्चित् समये सः संयुक्त न भविष्यति, यस्य तस्य व्यापकता (विमुल) सिद्धः न भविष्यति । परिशेषात् तृतीय प्रकार एकः श्रेष्ठ: विद्यते, येन् समस्त मूर्त द्रव्यः तस्य परिध्याम् आगत्वात् यगुपत् तेन संयुक्तः भविष्यन्ति । एतादृशस्य स्थित्यामेव तस्य आत्माया व्यापकता निर्बाधः सिद्धयेत ।

अस्य सम्बन्धे एक: शंका उत्पद्यते यत्– आत्माया: विभुः स्वीकरणे किमस्ति आवश्यकता? तस्य मध्यम परिमाणः अर्थात् तस्य सम्पूर्ण शरीरे व्यापकत्वा ज्ञातव्य योग्योस्ति । किन्तु तस्य परममहत् परिमाण स्वीकरणम् स्पष्टो न भवति ।

अस्य शंकाया समाधाने तर्कभाषाकारः कथयति– समस्त विश्वे आत्मायाः कार्य उपलब्धेन तस्य सर्वत्रः अस्तित्वं विद्यते । न तु केवलं शरीरे । सांख्य दर्शने आत्माया विभु परिमाणः स्वीक्रियते। परन्तु तस्य मते सः "सर्वमूर्तद्रव्यसंयोगित्व" रूपे नास्ति। अपितु सः विभुत्व अर्थात् अपरिच्छिन्नत्वरूपे अस्ति । अर्थात् परिमाण शून्योस्ति । सांख्यदर्शनानु सारेण अस्यः कोऽपि परिमाणोनास्ति । जैनदार्शनिकानुसारेण- आत्माया मध्यपरिमाणोस्ति ।

अस्य सिद्धान्तस्य खण्डने आस्तिक दर्शनः कथ्यति यत्– आत्माया द्रव्यः एवञ्च पर्यायः उभौ अंशः यदि परस्परे एकः - द्वितीयेन परस्पर भिन्ने सति तदा पर्याय अंशेन संकोच – विकासस्य तस्य द्रव्यात्मक अंशोपरि कोऽपि प्रभावः न भविष्यति, तदा आत्माया मध्यम परिमाणः कथं भविष्यति । जैन दर्शनस्य सिद्धान्ते कृतहान एवञ्च अकृताभ्यागम दोषोस्ति ।

वेदान्तदर्शने अस्य परिमाणस्य सम्बन्धे द्वौ प्रकारकस्य मतं प्राप्यन्ते । अद्वैत वेतात्यानुसारेण आत्मा ब्रह्म रूपोस्ति। एवञ्च ब्रह्मः परिमाणशून्योस्ति, अनेन कारणेन आत्मामपि परिमाण शून्योस्ति। तस्य विमुखं परिमाणशून्यत्वरूपोस्ति । अस्य मते जीवात्मा अन्तः करणावच्छिन्न चैतन्यरूपोस्ति । अनेन कारणेन अन्तःकरणस्य परिमाणस्य दृष्ट्या ते मध्यमपरिमाण धारीनः भविष्यति ।

अन्य वैष्णवदार्शिकेन आत्मा सम्बन्धे अणु परिमाण धारिणः आत्मा स्वीक्रियते । अणु कारणेन यद्यपि सः शरीरस्य हृदय भागे स्थितो भवति, तथापि, तस्य ज्ञानरूपः प्रभा (प्रकाशः) सम्पूर्ण शरीरे व्याप्तो विद्यते । अतएव सुख-दुःखादि युगपत् अनुभवेन कोऽपि व्यवधानं न भवति । कथंतु शरीरे स्थितः ज्ञानवाहिनीक्रियावाहिनी अंगमाध्यमेन शरीरे उत्पन्नमाना क्रियाया संवेदने कोऽपि व्यवधानं न उत्पद्यते । आत्माया अणुत्वस्य प्रतिपादकः श्रुति वचनं निम्नलिखितोस्ति–

**एषाऽणुरात्मा चेतसा वेदितव्यः।**

उपरोक्त श्रुतिवाक्ये अणुत्वस्य तात्पर्यः अणुपरिमाणस्य कथने नास्ति । अपितु बाध्येन्द्रियेन तस्य अवेद्यता कथने अस्ति । एवञ्च अनुमाण प्रमाणेनाऽपि स्पष्टो भवति यत्– सः अणुपरिमाण धारिणः नास्ति । अर्थात् आत्मा अणुत्वरहितः इन्द्रियग्राह्यगुणाधिकरणत्वात् कुम्भवत् इति । अतः आत्मा अणुत्वपरिमाणधारिणः स्वीकरणे दोषो ऽस्ति । तेन सदृशः आत्मा मध्यमपरिमाणवानः नास्ति । कथंतु अत्र सावयवत्वादि दोषः प्रसक्तो भवति । उपरोक्त विवेचनेन आत्माया विमुख स्वीकरणे नापि कोऽपि दोषोस्ति । आत्मत्व सामान्यवानात्मा अर्थात् आत्मत्वं (चैतन्यम्) यस्मिन् विद्यते--स आत्मा अस्ति । सः देह इन्द्रि यादिभ्यः पृथक् प्रत्येकं शरीरे पृथक्-पृथग् अस्ति । विभुः तथा नित्यः। तस्य आत्मनः मानसं प्रत्यक्षं भवति । तस्य भोगापतनमन्त्यावयवि शरीरम् अर्थात् तस्य आत्मनः भोगस्य आश्रयम् अन्य-अवयवि शरीरमास्ते । सुख-दुःखयो कस्यात्येकस्य प्रत्यक्षानुभवः भोग इत्यभिधीयते । स च भोग: येन अवच्छिन्ने आत्मनि आस्ते, तद् भोगायतनम् विद्यते तदेव शरीरम् । अथवा चेष्टायाः आश्रयम् शरीरम् । आत्माविहीनो शरीर: मृत शरीर: कथ्यते ।

न्यायादिदर्शनरीत्या आत्मतत्त्वविचारस्य निष्कर्ष क्रमे मया प्राप्यते यत् न्यायदर्शने तावत् जीवात्मा परमात्मा च आत्मशब्देन व्यपदिश्यते आत्मा तु परमात्मा क्षेत्रज्ञश्चेति द्विविधः। परमात्मा ईश्वरः एक एव । क्षेत्रज्ञा अस्मदादयोऽनन्ता एव इति सप्तपदार्थ्याम् । सुखदुःखादीनाम् आश्रयो जन्ममरणाधीनश्च जीवात्मा । नित्यज्ञानवान् सृष्टिस्थितिप्रलय कर्ता सर्वज्ञः सर्वशक्तिमान ईश्वरः।

आत्मालक्षणं तावत् - ज्ञानाधि करणम् आत्मा इति । ज्ञानस्य अधिकरणम् आत्मा । यद्वा आम्मत्वजाति मान् आत्मेति लक्षणम् । सा च आत्मत्व जातिः जीवात्मनि परमात्मनि च वर्तते । जीवात्मनि सुख दुःखादीनां समवायिकारणतावच्छेकतया आत्मत्वं सिद्धम् । परमात्मनि अपि आत्मत्वजातिरस्ति ।

चार्वाकमते चैतन्यविशिष्टो देह एवात्मा । पृथिव्यादिभूतचतुष्टयस्य परिणामेन देहे चैतन्यमुत्पद्यते । देहेन सहैव तस्य उत्पत्तिविनाशांगी कारात् अनित्यत्वंत स्य । चार्वाकैकदेशिनः केचिद् इन्द्रियाण्येवात्मा इत्याहुः। अपरे च मन एवात्मेति मन्यन्ते । बौद्धेषु माध्यमिकानां मते शून्यमेवात्मा। योगाचार-बौद्धानां मते विज्ञानस्वरूप आत्मा । योगाचार - बौद्धानां मत विज्ञानस्वरूप आत्मा । तस्य च प्रतिक्षणं भेदाद् अनित्यत्वम् । जैनानां मते देहपरिमाणो देहाद्यतिरिक्तो जीवात्मा । नैयायिकवैशेषिकाणां नये तावद् देहेन्द्रियेभ्यो भिन्नो नित्यो विभुः आत्मा अंगी क्रियते । तदुक्तम्- जीवास्तु प्रतिशरीरं भिन्नो विभुर्नित्यश्च इति अन्नं भट्टपादैः।

अतः आत्मा वा अरे द्रष्टव्यः इत्यादि श्रुतौ आत्मशब्द व्यवहारात् । तस्मिन् सुखादीनां स्वरूप्योग्यकारणतासत्त्वात् तदवच्छेदकतया च आत्मत्वसिद्धः। इश्वरे आत्मत्वजातिर्नास्त्येव, सुखदुःखा-दिजनकताया स्तत्र अभावात् । न च ईश्वरस्य दशमद्रव्यत्वापत्तिः, ज्ञानवत्त्वेन ज्ञाना धिकरणत्वेन वा तस्य आत्मनि अन्तर्भावात् इत्याहु । वैदान्तिकानां मते आत्मा ज्ञानस्वरूपः सुखस्वरूपशत। नैयायिकानां मते तु ज्ञानम् आत्मनो न स्वरूपम् अपि तु धर्मविशेषः। एवम् आनन्दम् अपि नात्मनः स्वरूपम् अपितु गुणविषय एव ।

**संदर्भाः**


1. न्यायसूत्र09/01/01-
2. मं० उ०09/03-
3. भारतीय दर्शन, जगदीश चन्द्र मिश्रः, चौखम्बा विद्या भवन, वाराणसीतः
4. रामानुज सिद्धान्त सारवरदाचार्य :
5. वैदिक कोषः, हंस राज एवं भगवदत्तः, राष्ट्रीय संस्कृत संस्थान, दिल्लीतः
6. भारतीय दर्शने श्री रामानन्द दर्शनस्य
7. भारतीय संस्कृत, डॉ० वाई०एस० रमेशः, हंस प्रकाशन, जयपुरतः
8. भारतीय दर्शनः, डॉ० पारश नाथ द्विवेदी, श्रीराम मेहरा कम्पनी, आगरातः